श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवात्स्यवरददेशिकैरनुगृहीतं

# ॥ श्री परमार्थ श्लोकद्वयम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री परमार्थ श्लोकद्वयम् ॥

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम्।
भाष्यामृतप्रदानाद्यः सञ्जीवयति मामपि ॥

सत्सङ्गात् भव निःस्पृहो गुरुमुखात् श्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्मशकलं प्रक्षीणकर्मान्तरः।
न्यासादेव निरङ्कुशेश्वरदयानिर्लूनमायान्वयो
हार्दानुग्रहलब्ध मध्यधमनिद्वारा बहिर्निर्गतः॥ 1 ॥

मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवातांशुमत्
ग्लौ विद्युत्वरुणेन्द्रधातृ महितः सीमान्तसिन्ध्वाप्लुतः।
श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन् परब्रह्मणः
सायुज्यं समवाप्य नन्दति समं तेनैव धन्यः पुमान्॥ 2 ॥

प्रातर्नित्यानुसन्धेयं परमार्थं मुमुक्षुभिः।
श्लोकद्वयेन संक्षिप्तं सुव्यक्तं वरदोऽब्रवीत्॥ 3 ॥

॥ श्री परमार्थ श्लोकद्वयं समाप्तम्॥